# tulasI pUjA 4

# તુલસીપૂજા ૪

## Document Information

Text title : tulasI laghupUjA 2

File name : tulasIpUjA4.itx

Category : pUjA, devii, tulasI, devI

Location : doc_devii

Transliterated by : Shree Devi Kumar

Proofread by : Shree Devi Kumar

Latest update : June 12, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 11, 2025

*sanskritdocuments.org*

tulasI pUjA 4

# તુલસીપૂજા ૪

તુલસી લઘુપૂજા ૨

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥

પરમેશ્વરપ્રીત્યર્થં શ્રી તુલસીદેવીપ્રીત્યર્થં
દીર્ઘસૌમઙ્ગલ્યપ્રાપ્ત્યર્થં સત્સન્તાનસિદ્ધ્યર્થં
સમસ્તસમ્પત્પ્રાપ્ત્યર્થં સર્વાભીષ્ટસિદ્ધ્યર્થં તુલસીપૂજાં કરિષ્યે ।
(અપ ઉપસ્પૃશ્ય)

અસ્મિન્ તુલસીક્ષુપે તુલસીં વૃન્દાં ધ્યાયામિ । આવાહયામિ ।
વૃન્દાવન્યૈ નમઃ - આસનં સમપર્યયામિ । વિશ્વપૂજિતાયૈ નમઃ -
પાદ્યં સમર્પયામિ । વિશ્વપાવન્યૈ નમઃ - અર્ઘ્યં સમર્પયામિ ।
પુષ્પસારાયૈ નમઃ - આચમનીયં સમર્પયામિ । નન્દિન્યૈ નમઃ -
સ્નાનં સમર્પયામિ । તુલસ્યૈ નમઃ - વસ્ત્રં સમર્પયામિ ।
કૃષ્ણજીવન્યૈ નમઃ - ગન્ધં સમર્પયામિ । કુઙ્કુમં સમર્પયામિ ।

અર્ચના - વૃન્દાયૈ નમઃ । ગોલોકવાસિન્યૈ નમઃ । કૃષ્ણપ્રિયાયૈ
નમઃ । સર્વરોગહરાયૈ નમઃ । સન્તતિપ્રદાયૈ નમઃ । સૌમઙ્ગલ્યદાયૈ
નમઃ । સૌભાગ્યપ્રદાયૈ નમઃ । પતિવ્રતાયૈ નમઃ । અતુલાયૈ નમઃ ।
વૃન્દાવન્યૈ નમઃ ।

વિશ્વપૂજિતાયૈ નમઃ - ધૂપં દર્શયામિ । દીપં દર્શયામિ ।
વિશ્વપાવન્યૈ નમઃ - નૈવેદ્યં સમર્પયામિ । પુષ્પસારાયૈ નમઃ -
કર્પૂરનીરાજનં દર્શયામિ । નન્દિન્યૈ નમઃ - પુષ્પાઞ્જલિં સમર્પયામિ ।
તુલસ્યૈ નમઃ । પ્રદક્ષિણં કરોમિ । કૃષ્ણજીવિન્યૈ નમઃ - નમસ્કારં
સમર્પયામિ ।

ઓઙ્કારપૂર્વિકે દેવિ સર્વવેદસ્વરૂપિણિ ।

સર્વદેવમયે દેવિ સૌમઙ્ગલ્યં પ્રયચ્છ મે ॥

વૃન્દે માં સર્વદા દેવિ કૃપાદૃષ્ટ્યા વિલોકય ।
પત્યુરાયુશ્ચ ભાગ્યં ચ સદા દેહિ હરિપ્રિયે ॥

પ્રસીદ મમ દેવેશિ પ્રસીદ હરિવલ્લભે ।
ઇતિ પ્રાર્થ્ય દ્વાદશવારં નમસ્કુર્યાત્ તુલસીસ્તુતિં પઠેત્ । પૂજાં
તુલસીચરણયોરર્પયેત્ ।

Encoded and proofread by Shree Devi Kumar

---

*tulasI pUjA 4*

pdf was typeset on May 11, 2025

Please send corrections to *sanskrit@cheerful.com*